National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(48): 178-181
© 2023 NJHSR
www.sanskritarticle.com

**विश्वजित्-पात्र:**
सहकारी अध्यापकः, संस्कृतविभागः,
विवेकानन्द-महाविद्यालयः हरिपालम्,
हुगली, पश्चिमवङ्गालम्, भारतम्

**Correspondence:**
**विश्वजित्-पात्र:**
सहकारी अध्यापकः, संस्कृतविभागः,
विवेकानन्द-महाविद्यालयः हरिपालम्,
हुगली, पश्चिमवङ्गालम्, भारतम्

# प्रत्याहारविमर्श:

**विश्वजित्-पात्र:**

**शोधसार:**

व्याकरणशास्त्रचर्चायां संस्कृतभाषाया: महामुनेः पाणिनेः च महत्वपूर्णमवदानमस्ति। यतो हि व्याकरणशास्त्रचर्चाया: शुभारम्भ: संस्कृतभाषया एव अभवत्। अपि च महामुने: पाणिने: 'अष्टाध्यायी' इति ग्रन्थ: व्याकरणशास्त्राय विज्ञानसम्मतं व्याख्यामार्गं दर्शितवान् इति। अनुमीयते यत् ख्री: पू: सप्तमशताब्द्याः आरभ्य चतुर्थशताब्द्याः च मध्ये महामुनिना पाणिनिना अष्टाध्यायविशिष्टा, प्राय: चतु:सहस्राणि च सूत्रसमन्विता 'अष्टध्यायी' इति ग्रन्थ: विरचित:। यद्यपि पाणिने: पूर्वम् आपिशलि-शाकटायन-शाकल्य-गार्ग्य-गालवादय: बहवः वैयाकरणा: संस्कृतभाषाया: व्याकरणं लिखितवन्तः, तथापि सम्प्रति तेषां रचनाः अस्माकं समीपे नोपलब्धा:। अपि च उत्कृष्टतायाः विचारेण पाणिने: अष्टाध्यायी अन्येषां संस्कृतव्याकरणपुस्तकानां अपेक्षया सर्वोत्तमा अस्ति। अतः इदानीन्तने काले यदा वयं संस्कृतव्याकरणस्य विषये वार्तां कुर्म: तदा पाणिनि:, तस्य अष्टाध्यायी च सर्वप्रथमं मनसि आगच्छत:। स्वकीयम् अष्टाध्यायीं संक्षिप्तं, सारगर्भं, वैज्ञानिकं च कर्तुं महामुनि: पाणिनि: अनुवृत्ति:, योगविभाग:, प्रत्याहार: चेत्यादीनि अनेकानि विशेषकौशलानि पारिभाषिकसंज्ञा: च स्वीकृतवान्। येन तस्य अष्टाध्यायी अन्येषु व्याकरणग्रन्थेषु उत्कृष्ट: अभवत्। अतः पाणिने: अष्टाध्यायीं सम्यक् अवगन्तुम् एतेषां सर्वेषां कौशलानां पारिभाषिकसंज्ञानां च ज्ञानं आवश्यकं भवति। अन्यथा वयम् अष्टाध्यायीं अवगन्तुं कदापि न शक्नुम:। प्रबन्धेऽस्मिन् प्रत्याहारसम्बन्धितानि प्राथमिकतथ्यानि, अष्टाध्याय्यां प्रत्याहारसंज्ञाया: च का विशेषभूमिका वर्ततेति संक्षिप्ततया आलोच्यते।

**कुटशब्दा:-** संस्कृतव्याकरणम्, पाणिनि:, अष्टाध्यायी, माहेश्वरसूत्रम्, इत्संज्ञकवर्ण:, प्रत्याहार:।

**प्रस्तावना**

महामुनि-पाणिने: पूर्वं बहवः वैयाकरणा: संस्कृतव्याकरणपुस्तकं लिखितवन्तः, परन्तु पाणिने: अष्टाध्यायी उत्कृष्टतायाः विचारेण सर्वोत्तमा आसीत्। नैके पण्डिता: ख्री. पू. सप्तमशताब्द्याः आरभ्य चतुर्थशताब्द्याः च मध्ये पाणिने: काल: आसीत् इति अनुमीयन्ते। विभिन्नेषु प्राचीनग्रन्थेषु उल्लेख: अस्ति यत् पाणिनि: शालातुर-ग्रामस्य निवासी आसीत् इति। सम्प्रति एष: पाकिस्तान-देशस्य अन्तर्गत: अस्ति। शालतुर-ग्रामस्य निवासी आसीत् इति कारणात्, सः विविधग्रन्थेषु 'शालातुरीय:' इति नाम्नापि परिचित: अस्ति। तस्य पितुः नाम शलङ्कि: दाक्षी च तस्य माता आसीत्। अतः सः विविधग्रन्थेषु दाक्षीपुत्रः, शालङ्कि: च इति उच्यते। बहव: वैयाकरणा: मन्यन्ते यत् पदार्थसंग्रहकार: व्याडि: आसीत् तस्य मातुल: मातुलपुत्रः वा। विविधग्रन्थेषु छन्दसूत्रकार: पिङ्गलाचार्यः पाणिने: अनुजः आसीत् इति उच्यते। तस्य गुरुवर्यस्य नाम आसीत् वर्ष: उपवर्षः वा। वैयाकरण: कौत्सादि: च तस्य शिष्य: आसीत्। यद्यपि पाणिनि: वैयाकरण: इति नाम्ना प्रसिद्ध: अस्ति तथापि जाम्बवतीविजयम् पातालविजयम् वा इति काव्यग्रन्थ: तस्य कृतिः इति कथ्यते। सः धातुपाठ:,गणपाठ:, उनादिपाठ:, लिङ्गानुशासनम् चेत्या-दीनि पुस्तकानि अपि अलिखत्। अष्टाध्यायी-सूत्रग्रन्थेण सह एतानि पुस्तकानि 'पञ्चाङ्गव्याकरणम्' इति

कथ्यते। परन्तु तस्य सर्वोत्तमा कीर्तिः आसीत् अष्टाध्यायविशिष्टा, प्रायः चतुःसहस्राणिसूत्रस्मन्विता अष्टाध्यायी इति। महामुनिना पाणिनिना स्वकीयं ग्रन्थं संक्षिप्तं सारगर्भं च कर्तुं कतिपयानि मौलिककौशलानि स्वीकृतानि। ग्रन्थेऽस्मिन् तेन यथा प्राचीन-पूर्वाचार्यैः व्यवहृताः प्रातिपदिक-कारक-समासादयः अकृत्तिमसंज्ञाः स्वीकृताः तथैव तेन स्वतन्त्रेण सृष्टाः टि-घु-उपधादयः काश्चन कृत्रिम-संज्ञाः व्यवहृत्य तस्य व्याकरणम् अत्यन्तं संक्षिप्तं मौलिकं च कृतवान्। एवम्प्रकारेण पाणिनिः अष्टाद्यायीं शृङ्खलयितुम् अनुवृत्तिः, विपरिणामः, आगमः, आदेशः, प्रत्याहारः इत्यादीनां परिभाषिकसंज्ञानामपि प्रवर्तनं कृतवान्। अतः पाणिनेः अष्टाध्यायीम् अवगन्तुं एतेषां सर्वेषां परिभाषिकसंज्ञानां ज्ञानं आवश्यकं भवति, अन्यथा वयं शास्त्रे कदापि न प्रवेष्टुं शक्नुष्यामः। प्रबन्धेऽस्मिन् प्रत्याहारसम्वन्धितानि प्राथमिकतथ्यानि, अष्टाध्याय्यां प्रत्याहार-संज्ञायाः च का विशेषभूमिका वर्ततेति संक्षिप्ततया आलोच्यते।

**प्रत्याहारः अष्टाध्याय्याः एका पारिभाषिकसंज्ञा**

कश्चन विषयम् अवगन्तुं तस्य विषयस्य कानिचन प्राथमिकतथ्यानि पूर्वमेव ज्ञातव्यानि भवन्ति। यथा वयं पादकन्दुकक्रीडां तदैव अवगमिष्यामः, आनन्दं च अनुभवामः यदा वयं फाउल, आउट-फाउल, कर्नार, पेनाल्टि, अफ-साइड इत्यादीनां पादकन्दुक-सम्बन्धीनां परिभाषानां विषये पूर्वमेव जानीमः। एवं प्रत्येकानां शास्त्राणां कानिचन परिभाषानि तिष्ठन्ति यानि पूर्वमेव न जानीमः चेत् शास्त्रप्रवेशः प्रायः असम्भवः भवति। एवं एषः प्रत्याहारः पाणिनेः अष्टाध्याय्याः एका पारिभाषिकसंज्ञा। अतः अष्टाध्याय्यां प्रवेशात् पूर्वं प्रत्याहारस्य ज्ञानमावश्यकं भवति। वस्तुतः प्रत्याहारः इत्यस्य आभिधानिकार्थः भवति परित्यागः इति। परन्तु संस्कृतव्याकरणजगति अस्य भिन्नार्थः वर्तते। वैयाकरणाः वदन्ति- 'प्रत्याह्रियन्ते संक्षिप्यन्ते शब्दाः अनेनेति प्रत्यहारः' इति। वैयाकरणाः अत्र कथयितुं इच्छन्ति यत् येन माहेश्वरसूत्रस्य ध्वनयः संक्षिप्तरूपेण अभिव्यक्तुं शक्यन्ते सैव प्रत्याहारः इति। इदानीं प्रश्नः आगमिष्यति यत् माहेश्वरसूत्रं किम्? वयं यदि अष्टाध्याय्याः कश्चन पाण्डुलिपिं पश्यामः तर्हि पुस्तकस्य प्रारम्भे १. अइउण् २. ऋलृक् ३. एओङ् ४. ऐऔच् ५. हयवरट् ६. लण् ७. ञमणनम् ८. झभय् ९. घढधष् १० जबगडदश् ११. खफछठथचटतव् १२. कपय् १३ शषसर् १४. हल् चेत्यादीनि चतुर्दशसूत्राणि द्रष्टुं शक्नुमः। एतानि चतुर्दशसूत्राणि माहेश्वरसूत्राणीति कथ्यते। एतानि सूत्राणि महेश्वरात् आगतानि प्राप्तानि वा अतः तानि माहेश्वरसूत्राणि इति। परन्तु एतेषां सूत्राणां रचनाकारः कः इत्यस्मिन् विषये पण्डितानां मध्ये वैमत्यमस्ति । केचन वदन्ति तानि पाणिनेः रचना केचन च वदन्ति एतानि महेश्वरस्य रचनेति। यद् भवतु एतानि पाणिनेः रचना न वा इति अत्र अस्माकमालोच्यः विषयः नास्ति, परन्तु नन्दिकेश्वरस्य काशिकायां विषयेऽस्मिन् एका कारिका वर्तते-

**नृत्तावासाने नटराजराजः ननाद ढक्कां नवपञ्चवारम्।**
**उद्धर्तुकामसनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्।।** इति।

**प्रत्याहारगठनस्य नियमः**

उपर्युक्तानि माहेश्वरसूत्राणि पाणिनेः अष्टाध्याय्याः स्तम्भस्वरूपाणि इति बहवः पण्डिताः वदन्ति। यतो हि सः एतान् माहेश्वरसूत्रान् अवलम्ब्य प्रत्याहारस्य निर्माणेन च स्वकीयम् अष्टाध्यायीं वैज्ञानिकं, संक्षिप्तं, सारगर्भं च कृतवान्। परन्तु प्रत्याहारस्य निर्माणं कथं भवति इति जिज्ञासायां सः 'आदिरन्त्येन सहेता' इति सूत्रं उल्लिखितवान्। सूत्रेऽस्मिन् आदिः, अन्त्येन, सह, इता, चेति चत्वारः पदानि वर्तन्ते। अपि च 'इता' 'अन्त्येन' चेत्ययोः पदयोः मध्ये विशेष्यविशेषण-सम्बन्धत्वेन सूत्रार्थः भवति माहेश्वरसूत्रस्थितेन अन्त्येन इत्वर्णेन सह सापेक्ष-आदिवर्णस्य संयोगेन यः निर्मितः भवति सः भवति प्रत्याहारः इति। यथा अइउण् इत्यत्र सूत्रस्थितेन अन्त्येन इता ण्-कारेण सह सापेक्षादिवर्णानां अ इ उ इत्यादिनां संयोगेन अण्, इण्, उण्, चेत्यादिः प्रत्याहारः संगठयितुं समर्थः भवामः। पुनः ऋलृक् इति सूत्रस्य अन्त्येन इता क्-कारेण सह तस्य पूर्वस्थितवर्णानां अ इ उ ऋ लृ इत्येषां वर्णानां सहयोगेन च अक् इक् उक् ऋक् लृक् चेत्यादयः प्रत्याहाराः संगठिताः भवितुमर्हन्ति। एवम्प्रकारेण चतुर्दशमाहेश्वर-सूत्रात् वयं प्रायः त्रिशताधिकान् प्रत्याहारान् निर्मातुं शक्नुमः। परन्तु महमुनिः पाणिनिः तदीये अष्टाध्याय्यां केवलं द्विचत्वारिंशत् मतान्तरे त्रिचत्वारिंशत्प्रत्याहारस्य व्यवहारं कृतवान्। इदानीं प्रश्नः आगच्छति यत् इत् इत्यनेन किं बोध्यते? सामान्यतया उपदेशेस्थितानां येषां वर्णानां लोपः भवति ते भवन्ति इत्संज्ञकाः। पुनश्च प्रश्नः जायते कः उपदेशः इति? वैयाकरणैः उच्यते 'उपदेश आद्योच्चारणम्' इति। अर्थात् संस्कृतव्याकरणस्य प्रामाणिकाचार्याणां पाणिनि-कात्यायन-पतञ्जलिनाम् एतेषां मुनित्रयानां महेश्वरस्य च उच्चारणस्य पूर्वं ये खलु विषयाः जगति ज्ञानस्य विषयाः न आसन् ते खलु विषयाः उपदेशः इति कथ्यते। यथा धातुः, सूत्रम्, प्रत्ययः, आगमः, आदेशः चेत्यादिः। बिषयेऽस्मिन् एका कारिका वर्तते-

**'धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्।**
**आगमप्रत्ययादेशा उपदेशाः प्रकीर्त्तिता॥'** इति।

अतः वयं जानीमः यत् धातु-प्रत्ययादिभिः सह संयुक्तं कतिपयाः ध्वनयः सन्ति याः पश्चात् लुप्ताः भवन्ति ते खलु इत्संज्ञकवर्णाः। महामुनिः पाणिनिः 'उपदेशेऽजनुनासिको इत्' 'हलन्त्यम्' 'आदिर्ञिटुडवः' 'षः प्रत्ययस्य' 'चुटू' 'लशक्वतद्धिते' चेत्यादिभिः सूत्रषट्कैः धातुप्रत्ययादिनां केषां वर्णानां इत्संज्ञा भवतीत्यस्मिन् बिषये तत् स्पष्टीकृतवान्।

**१। उपदेशेऽजनुनासिको इत् (१/३/२)**

आलोच्यसूत्रानुसारं उपदेशस्थितानां अनुनासिकस्वराणां अचां वा इत्संज्ञा भवति अनन्तरं 'तस्य लोपः' इत्यनेन सूत्रेण इत्संज्ञकस्य वर्णस्य लोपः भवति। यथा एध-धातौ (ए ध् अ) ए अ चेति स्वरद्वयं

वर्तते। एतयो: अनुनासिकस्य अ-कारस्य प्रकृतसूत्रेण इत्संज्ञायां लोपे च एध् इति जाते विविधप्रक्रियानन्तरं 'एधते' 'एधेते' चेत्यादीनि रूपाणि सिद्ध्यन्ति।

**२। हलन्त्यम् (१/३/३)**

सूत्रेऽस्मिन् हल्, अन्त्यम् चेति पदद्वयं वर्तते। अनन्तरं उपदेशः इति पदस्य अनुवृत्त्या सूत्रार्थ: भवति उपदेशस्थितस्य अन्त-हल्-वर्णस्य अर्थात् अन्तव्यञ्जनवर्णस्य इत्संज्ञा भवति अनन्तरं 'तस्य लोप:' इत्यनुसारं इत्संज्ञकस्य वर्णस्य लोप: भवति। माहेश्वरसूत्रस्थितानां अन्तव्यञ्जनानां तथा ण् क् ङ् च् चेत्यादीनां वर्णानां 'हलन्त्यम्' इति सूत्रेणैव इत्संज्ञा भवति।

**३। आदिर्ञिटुडव: (१/३/५)**

मूलसूत्रानुसारं समुदायस्य प्रारम्भस्थितानां ञि, टु, डु चेत्यादीनां विषयानां इत्संज्ञा भवति। यथा 'ञिमिदा' इत्यत्र प्रकृतसूत्रानुसारेण ञि-इत्यस्य इत्संज्ञायां तस्य लोपे, विविधप्रक्रियान्तरं च मिन्न: इति रूपं सिद्ध्यति। एवम्प्रकारेण 'टुवेपृ' समुदायस्य 'टु' इति, 'डुपचष्' समुदायस्य 'डु' चेत्येतयो: इत्संज्ञायां 'तस्य लोप:' इति सूत्रानुसारं लोपे च यथाक्रमं 'वेपुथ:' 'पक्त्रिमम्' चेति पदद्वयं निष्पद्यते।

**४। ष: प्रत्ययस्य (१/३/६)**

प्रत्ययस्य पूर्वस्थितस्य 'ष' इत्यस्य प्रकृतसूत्रेण इत्संज्ञानन्तरं 'तस्य लोप:' इत्यनेन सूत्रेण च लोप: भवति। यथा नृत् + ष्वुन् इत्यस्मिन् स्थाने यथाक्रमं 'हलन्त्यम्' 'ष: प्रत्ययस्य' चेत्याभ्यां सूत्राभ्यां ष्वुन्-प्रत्ययस्य न-कारष-कारयो: इत्संज्ञा भवति। अनन्तरं 'तस्य लोप:' इति सूत्रानुसारं इत्संज्ञकानां वर्णानां लोपे नृत्+ वु इति जाते 'युवोरनाकौ' इति सूत्रानुसारं वु-इत्यस्य स्थाने अकादेशे नृत् + अक् इति स्थिते 'सार्वधातुकार्द्धधातुकयो:' इति सूत्रानुसारं नृत्-धातो: इगन्ताङ्गस्य गुणे अरादेशे च नर्तक: इति पदं सिद्ध्यति।

**५। चुटू (१/३/७)**

प्रत्ययस्य पूर्वस्थितस्य चवर्गस्य (च् छ् ज् झ् ञ्) टवर्गस्य (ट् ठ् ड् ढ् ण्) च आलोच्यसूत्रानुसारं इत्संज्ञा भवति। अनन्तरं 'तस्य लोप:' इति सूत्रेण इत्संज्ञकस्य वर्णस्य लोप: भवति। यथा कुञ्ज+ च्फञ् इत्यत्र 'हलन्त्यम्' 'चुटू' चेत्याभ्यां सूत्राभ्यां यथाक्रमं ञ्-इत्यस्य च्-इत्यस्य च इत्संज्ञा भवति। अनन्तरं तेषां लोपे विविधप्रक्रियान्तरं च कौञ्जायन: इति पदं सिद्ध्यति।

**६। लशक्कतद्धिते (१/३/८)**

अतद्धितप्रत्ययानां पूर्वस्थितानां ल्-श्-इत्ययो: क्-वर्गानां (क् ख् ग् घ् ङ्) च आलोच्यसूत्रेण इत्संज्ञा भवति। अनन्तरं लोप: भवति। यथा चि+ल्युट् इत्यत्र यथाक्रमं 'हलन्त्यम्' 'लशक्कतद्धिते' चेत्याभ्यां सूत्राभ्यां ट्कारस्य ल्-कारस्य च इत्संज्ञायां अनुबन्धलोपे च चि+यु इति जाते 'युवोरनाकौ इति सूत्रेण अनादेशे, 'सार्वधातु-कार्द्धधातुकयो:' इति सूत्रेण चि-धातो: इगन्ताङ्गस्य गुणे चे+अन इति जाते 'एचोऽयावायाव:' इति सूत्रेण अयादेशे च चयनमिति पदं सिद्ध्यति।

उपर्युक्तसूत्रेषु 'हलन्त्यम्' इति सूत्रेण माहेश्वरसूत्रस्थितान् अन्तव्यञ्जनान् तथा ण् क् ङ् च् इत्यादीनां इत्संज्ञा भवति। अनन्तरं एतै: इत्वर्णै: सह सापेक्षादिवर्णानां संयोगेन प्रत्याहारस्य निर्माणं भवति। किन्तु प्रत्याहारस्य निर्माणे केचन विषया: ध्यानेन स्मरणीया:-

**प्रथमतः-** प्रत्याहारेषु इत्वर्णानां ग्रहनं न भवति। यथा अच् इति प्रत्याहारे अ इ उ ण् ऋ ऌ क् ए ऐ ङ् ओ औ च् एते वर्णा: तिष्ठन्ति। परन्तु अच्-प्रत्याहारेण केवलं अ इ उ ऋ ऌ ए ऐ ओ इत्येतेषां वर्णानां अपि च एतेषां स्ववर्णानां ग्रहणं भवति। अत्र इत्संज्ञकानां ण् क् ङ् च् इ चेत्यादिनां वर्णानां ग्रहणं न भवति। तथाहि पण्डितप्रवरेण भट्टोजीदीक्षितेन तस्य वृत्तौ उच्यते- 'प्रत्याहारेष्वितां न ग्रहणम्' इति।

**द्वितीयत:-** माहेश्वरसूत्रेषु विद्यमानै: व्यञ्जनै: सह संयुक्तानानां स्वरवर्णानां प्रत्याहारेषु ग्रहणं न भवति। यथा यण्-प्रत्याहारे विद्यमानानां व्यञ्जनानां प्रक्रियादशायां य् व् र् ल् इति रूपेण अर्थात् स्वरविहीनतया एव प्रयोग: भवति। तथाहि भट्टोजिदीक्षितेन तस्य वृत्तौ स्पष्टतया उच्यते- 'हकारादिष्वकार: उच्चारणार्थ:' अर्थात् माहेश्वरसूत्रेषु हकारादिषु व्यञ्जनेषु य: अकार: वर्तते स: केवलं उच्चारणस्य सौविधार्थं वर्तते। कारणं स्वविहीनव्यञ्जनवर्णानां उच्चारणं कदापि न सम्भवति।

**तृतीयतः-** साधारणतया माहेश्वरसूत्रस्य अन्तस्थितानां व्यञ्जनानां इत्संज्ञा भवति। परन्तु लण्-सूत्रस्थितस्य (ल् अ ण्) अकारस्यापि 'उपदेशेऽजनुनासिको इत्' इति सूत्रेण इत्संज्ञा भवति। एष: र-प्रत्याहारगठने विशेषभूमिकां गृह्णाति।

**चतुर्थत:-** माहेश्वरसूत्रेषु प्रचलितपौर्वापर्यानुसारं स्वरानां व्यञ्जनानां च व्यवस्थापनं नास्ति। अत्र एकेन विशेषक्रमेण स्वरा: व्यञ्जना: च व्यवस्थिता: सन्ति। प्रत्याहारगठनसमये एतस्य क्रमस्य उल्लङ्घनं न करणीयम्।

**पञ्चमत:-** वयं त्रिचत्वारिंशत्प्रत्याहारेषु अण्-प्रत्याहारं वारद्वयं द्रष्टुं शक्नुम:। किन्तु उभययो: मध्ये पार्थक्यं वर्तते। 'ट्रलोपे पूर्वस्य दीर्घोऽण:' इति सूत्रस्थितेन अण्-प्रत्याहारेण अ इ उ इत्येतेषां वर्णानां ग्रहणं भवति। परन्तु 'अणुदित् सवर्णस्य चाप्रत्यय:' इति सूत्रस्थितेन अण्-प्रत्याहारेण न केवलम् अ इ उ इत्येतेषां अपि च ऋ ऌ ए ओ ऐ औ ह् य् व् र् ल् इत्येतेषामपि ग्रहणं भवति।

**प्रत्याहारस्य संख्या, अष्टाध्याय्या: सूत्रेषु तेषां प्रयोगश्च**

चतुर्दशमाहेश्वरसूत्रम् अवलम्ब्य 'आदिन्त्येन सहेता' इति सूत्रानुसारं वयं प्रायः त्रिशताधिकान् प्रत्याहारान् निर्मातुं शक्नुमः। परन्तु महामुनि: पाणिनि: स्वकीये अष्टाध्याय्यां ४२ मतान्तरे ४३ प्रत्याहारान् व्यवहृतवान्। उल्लेख्यं यत् विविधेषु सूत्रेषु केषाञ्चन प्रत्याहारानां प्रयोग: एकाधिकवारं दृश्यते। यथा 'हलन्त्यम्' 'हलोन्तरा: संयोग:' 'हलो यमां यमि लोप:' इत्यादिषु सूत्रेषु हल्-प्रत्याहारस्य व्यवहारं दरीदृश्यते। परन्तु अष्टाध्याय्यां सर्वसाकुल्येन ४२ मतान्तरे ४३ प्रत्याहारा: दृश्यन्ते। इदानीं प्रत्येकस्य प्रत्याहारस्य नाम सूत्रेषु तेषां प्रयोगश्च पश्याम:। यतो हि व्याकरणस्य

प्रारम्भिकछात्राणां कृते अष्टाध्याय्याः चतुःसहस्रसूत्रेषु कुत्र ४३ प्रत्याहाराणां प्रयोगः पाणिनिना कृतः तस्य अन्वेषणं अतीव कष्टकरं भवति। तदर्थं अस्मिन् प्रबन्धे केषु पाणिनीयसूत्रेषु प्रत्याहारस्य प्रयोगः दृश्यते तदेव अधः प्रस्तुयते- १. अण्- ट्रलोपे पूर्वस्य दीर्घो**ऽणः** (६/३/१११) २. अक्- **अकः** सवर्णे दीर्घः (६/१/१००) ३. अच्- इको **यणचि** (६/१/७७) ४. अट्- **अट्कु**प्वाङ्नुम्व्यवायेऽपि (८/४/२) ५. अण्- **अणु**दित् सवर्णस्य चाऽप्रत्ययः (१/१/६९) ६. अम्- पुमः **खय्यम्प**रे (८/३/६) ७. अश्- भोभगोअघोअपूर्वस्य यो**ऽशि** (८/३/१७) ८. अल्- **अलो**ऽन्त्यात् पूर्वोपधा (१/१/६५) ९. इक्- **इको** गुणवृद्धी (१/२/३) १०. इच्- ना**दिचि** (६/१/१०४) ११. इण्- **इणः** षः (८/३/३८) १२. उक्- **उगि**दचां सर्वनामस्थानेऽधातोः १३. एङ्- **अदेङ्** गुणः (१/१/२) १४. एच्- **एचो**ऽयवायावः (६/१/७८)१५. ऐच्- वृद्धिरा**दैच्** (१/१/१) १६- हश्- **हशि** च (६/१/११३) १७. हल्- **हल**न्त्यम् १८. यण्- इको **यण**चि (६/१/७७) १९. यम्- हलो यमां **यमि** लोपः (८/४/६४) २०. यञ्- अतो दीर्घः **यञि** २१. यय्- अनुस्वारस्य **ययि** परसवर्णः (८/४/५८) २२. यर्- **यरो**ऽनुनासिकेऽनुनासिको वा (/८/४/४५) २३. वश्- ने**ड्वशि** कृति २४. वल्- आर्द्धधातुकस्येड् **वला**दे: (७/२/३५) २५. रल्- **रलो** व्युपधाद्धलादेः संश्च २६. मय्- **मय** उञो वो वा (८/३/३३) २७. ङम्- **ङमो** ह्रस्वादचि ङमुण् नित्यम् (८/३/३२) २८. झष्- एकाचो वशो भष्-**झष्न्त**स्य रध्वोः (८/२/३७) २९. झश्- झलां जश् **झशि** (८/४/५३) ३०. झय्- **झयो** होऽन्यतरस्याम् (८/४/६२) ३१. झर्- **झरो** झरि सवर्णे (८/४/५६) ३१. झल्- इको **झल्** ३३. भष्- एकाचो वशो **भष्**-झष्न्तस्य रध्वोः (८/२/३७) ३४. जश्- झलां **जश्** झशि ३५. वश्- एकाचो **वशो** भष्-झष्न्तस्य रध्वोः (८/२/३७) ३६. खय्- पुमः **खय्य**म्परे (८/३/६) ३७. खर्- **खर**वसनयोर्विसर्जनीयः (८/३/१५) ३८. छव्- न**श्छव्य**प्रशान् (८/३/७) ३९. चय्- **चयो** द्वितीयाः शरि पौष्करसादेरिति वाच्यम् (वा) ४०. चर्- अभ्यासे **चर्च** (८/४/५४) ४१. शर्- **शरो**ऽचि (८/४/४९) ४२. शल्- **शल** इगुपधादनिटः क्सः (३/१/४५) ४३. र- उरण् **र**परः (१/१/५१)।

**उपसंहारः**

महामुनिना पाणिनिना स्वकीयं अष्टाध्यायीं वैज्ञानिकं, संक्षिप्तं, सारगर्भं च कर्तुं अनुवृत्तिः, योगविभागः, विपरिणामः, प्रत्याहारः इत्यादीनि विविधानि मौलिककौशलानि स्वीकृतानि। एतेषु प्रत्याहारः अन्यतमः अस्ति। तत्कालीन्भारतवर्षे सर्वाधिकप्रचलितायाः बहुशब्दसमृद्धायाः संस्कृतभाषायाः व्याकरणरचना सरला नासीत्। परन्तु महामुनिः पाणिनिः तत्कार्यं कृतवान्, माहेश्वर-सूत्राणि स्वीकृत्य प्रत्याहारनिर्माणस्य विचारः तस्य एतत्कार्यं अतीव सरलं अधिकं युक्तियुक्तं च कृतवान्। वस्तुतः, महामुनिः पाणिनिः प्रत्याहारस्य उपयोगेन स्वकृतानि सूत्राणि लघुतराणि कृतवान्। यथा 'इको यणचि' इति सूत्रं पश्यतु। अत्र इक् यण् अच् चेति प्रत्याहारत्रयं व्यवह्रियते। सूत्रस्यार्थः भवति इक्-इत्यस्य स्थाने यण् भविष्यति अचि परे सति। इक्-इत्यनेन इ उ ऋ लृ इत्येते वर्णाः गृह्यन्ते। यण्-इत्यनेन य् व् र् ल् इत्येते वर्णाः बोध्यन्ते। अच्-इत्यनेन च समस्तस्वरवर्णाः बोध्यन्ते। अत्र यदि पाणिनिः अस्मिन् सूत्रे एतेषां प्रत्याहाराणां व्यावहारं न अकरिष्यत् तर्हि सूत्रमेतं एवं संक्षिप्तरूपेण अभिव्यक्युं सः असमर्थः अभविष्यत् इति । महामुनिः पाणिनिः प्रत्याहारस्य व्यवहारपूर्वकं तस्य अष्टाध्यायीं संक्षिप्ता अकरोत्। वयं पूर्वमेव आलोचितवन्तः यत् आचार्यपाणिनिः स्वकीये अष्टाध्याय्यां ४२ मतान्तरे ४३ प्रत्याहारान् व्यवहृतवान्। अत एव पाणिनेः अष्टाध्याय्याः सम्यक् पठनाय बोधनाय वा प्रारम्भे अन्येभिः परिभाषाभिः सह प्रत्याहारस्य विशेषज्ञानं आवश्यकं भवति। प्रबन्धेऽस्मिन् वयं प्रत्याहारस्य काञ्चन प्राथमिकविषयान् आलोचितवन्तः ये खलु विषयाः अष्टाध्याय्याः प्रारम्भिकपाठकानां कृते विशेषसहायकाः भविष्यन्ति इति शम्।

**सहायकग्रन्थसूची**


१.चक्रवर्ती, सत्यनारायणः, पाणिनीय शब्दशास्त्र, संस्कृत-पुस्तक-भाण्डारः, प्रथमप्रकाशः, २००३, कलकाता।

२.लाहिडि, प्रवोधचन्द्रः, शास्त्री हृषीकेशः, पाणिनीयम्, दि ढाका स्टुडेन्दस् लाइब्रेरी, षष्ठसंस्करणम्, पुनमुद्रणम्, आगस्ट २००९, कलकाता।

३.भट्टाचार्यः तपनशङ्करः, अष्टाध्यायी, संस्कृत-वुक-डिपो, प्रथम-प्रकाशः, पुनर्मुद्रणम्, मार्च २०१२, कलकाता।

४.च्याटार्जी, क्षितिशचन्द्रः, टेकनिक्याल टार्मस् एण्ड टेकनिक ओफ् स्यान्सकृत ग्रामार, संस्कृत-पुस्तक-भाण्डारः, २००४, कलकाता।

५.श्रीगोविन्दाचार्यः,शर्मा,लक्ष्मी,वैयाकरणसिद्धान्तकौमुदी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१६।

६.चतुर्वेदः, गिरिधरशर्मा, विद्याभास्करः, परमेस्वरानन्दशर्मा, वैयाकरणसिद्धान्तकौमुदी, पुनर्मुद्रणम्, मोतिलाल वनारसीदास, दिल्ली, २०१२।

७.त्रिपाठी, जयशङ्करलालः, मालवीयः, सुधाकरः, काशिका, तारा-वुक्-एजेन्सी, वाराणसी, २००९ (प्रथमसंस्करणम्, पुनर्मूद्रणम्).

८.पालः, विपद्भञ्जनः, श्रीवरदराजविरचिता लघुसिद्धान्तकौमुदी, सदेशः, प्रथमप्रकाशः, द्वितीयसंस्करणम्,२०१२ कलकाता।

९.पण्डा अशोक-कुमारः, वैयाकरणसिद्धान्तकौमुदी अजन्तपुंलिङ्ग-प्रकरणम्, प्रग्रेसिभ पावलिशार्स, प्रथमप्रकाशः २०१२, कलकाता।

१०.गङ्गोपाध्यायः मृणालकान्तिः, वैयाकरणसिद्धान्तकौमुदी संज्ञा-परिभाषाप्रकरणम्, संस्कृत वुक् डिपो, द्वितीयसंस्करणम्, १४२० वङ्गाव्दः, कलकाता।